# २२. पादुका सहस्रम् - काञ्चन पद्धतिः (२०)

कल्याण प्रकृतिं वन्दे भजन्तीं काञ्चनश्रियम् ।
पदार्हां पादुकां शौरेः पद एव निवेशिताम् ॥ २२.१॥ ७३१॥

मधुजित्तनु कान्ति तस्कराणां जलदाना मभयं विधातुकामा ।
चपलेव तदङ्घ्रि माश्रयन्ती भवती काञ्चनपादुके विभाति ॥ २२.२॥ ७३२॥

निकषीकृत रम्य कृष्णरत्ना भवती काञ्चन सम्पदं व्यनक्ति ।
परिपुष्यति पादुके यदीक्षा सहसा नः समलोष्ट काञ्चनत्वम् ॥ २२.३॥ ७३३॥

सुरभि र्निगमैः समग्रकामा कनकोत्कर्षवती पदावनि त्वम् ।
दिशसि प्रतिपन्न माधवश्री रनिशोन्निद्रम शोकवैभवं नः ॥ २२.४॥ ७३४॥

सति वर्णगुणे सुवर्णजाते र्जगति व्यात मसौरभा दवर्णम् ।
श्रुतिसौरभ शालिना स्वहेम्ना भवती शौरिपदावनि व्युदास्थत्॥२२.५॥७३५॥

प्रतिपन्न मयूर कण्ठ धाम्ना परिशुद्धेन पदावनि स्वकेन ।
कमलास्तन भूषणोचितं तद्भवती रत्नमलङ्करोति हेम्ना ॥ २२.६॥ ७३६॥

कान्त्या परं पुरुषमा प्रणखात् सुवर्णं
कर्तुं क्षमा त्वमसि काञ्चन पादरक्षे ।

अन्यादृशीं दिशसि या विनतस्य दूरात्
आरग्वध स्तबक सम्पद मिन्दुमौलेः ॥ २२.७॥ ७३७॥

चन्द्राकृतिः कथम कल्पयथा स्तदानीं
वैमानिक प्रणयिनी वदनाम्बुजानाम् ।
विक्रान्ति काल विततेन निजेन धाम्ना
बालातपं बलिविमर्दन पादुके त्वम् ॥ २२.८॥ ७३८॥

लेभे तदा प्रभृति नूनमियं भवत्याः
कान्त्या कवेर तनया कनकापगात्वम् ।
यावन्मुकुन्द पदहेम पदावनि त्वं
पुण्यं विभूषितवती पुलिनं तदीयम् ॥ २२.९॥ ७३९॥

चित्रं सरोज निलया सहितस्य शौरेः
वासोचितानि चरणावनि संविधित्सोः ।
सद्यो विकास मुपयान्ति समाधि भाजां
चन्द्रातपेन तव मानस पङ्कजानि ॥ २२.१०॥ ७४०॥

त्वय्येव पाद मधिरोप्य नवं प्रवाहं
नाथे पदावनि निशामयितुं प्रवृत्ते ।
आत्मीय काञ्चन रुचा भवती विधत्ते
हेमारविन्द भरिता मिव हेम सिन्धुम् ॥ २२.११॥ ७४१॥

विहरति पुलिनेषु त्वत्सखे रङ्गनाथे
कनकसरिदियं ते पादुके हेमधाम्ना ।
वहति सलिल केली स्रस्त चोलावरोध-
स्तनकलश हरिद्रा पङ्क पिङ्गा मवस्थाम् ॥ २२.१२॥ ७४२॥

सुरभि निगम गन्धा सौम्य पद्मा करस्था
कनक कमलिनीव प्रेक्ष्यसे पादुके त्वम् ।
भ्रमर इव सदा त्वां प्राप्त नानाविहारः
शतमख मणिनीलः सेवते शार्ङ्गधन्वा ॥ २२.१३॥ ७४३॥

कनकरुचि रवर्णां पादुके सह्यसिन्धुः
श्रियमिव महनीयां सिन्धु राजस्य पत्नी ।
स्वयमिह सविधस्था सौम्य जामातृ युक्तां
उपचरति रसेन त्वामपत्याभि मानात् ॥ २२.१४॥ ७४४॥

अनुकल मुपजीव्या दृश्यसे निर्जराणां
त्रिपुर मथन मौलौ शेखरत्वं दधासि ।
प्रतिपद मधिगम्य प्राप्त शृङ्गाऽसि शौरेः
तदपि चरणरक्षे पूर्ण चन्द्राकृति स्त्वम् ॥ २२.१५॥ ७४५॥

कनकमपि तृणं ये मन्वते वीतरागाः

तृणमपि कनकं ते जानते त्वत्प्रकाशैः ।
मधुरिपु पदरक्षे यत् त्वदर्थोपनीतान्
परिणमयसि हैमान् देवि दूर्वाङ्कुरादीन् ॥ २२.१६॥ ७४६॥

विशुद्धि मधिगच्छति ज्वलन सङ्गमात् काञ्चनं
विदन्ति च जगन्ति तन्न खलु तद्विपर्यस्यति ।
कथं कनक पादुके कमल लोचने साक्षिणि
त्वयैव परिशुद्धता हुतभुजोऽपि जाघट्यते ॥ २२.१७॥ ७४७॥

तारासङ्ग प्रथित विभवां चारु जाम्बून दाभां
त्वामारूढ स्त्रिदश महितां पादुके रङ्गनाथः ।
सञ्चारिण्यां सुरशिखरिण स्तस्थुषा मेखलायां
धत्ते मत्त द्विरद पतिना साम्यकक्ष्यां समीक्ष्याम् ॥ २२.१८॥ ७४८॥

कनक रुचिरा काव्या ख्याता शनैश्चरणोचिता
श्रितगुरुबुधा भास्वद्रूपा द्विजाधिप सेविता ।
विहित विभवा नित्यं विष्णोः पदे मणिपादुके
त्वमसि महति विश्वेषां नः शुभा ग्रहमण्डली ॥ २२.१९॥ ७४९॥

प्रज्वलित पञ्चहेतिः हिरण्मयीं त्वां हिरण्य विलयार्हः ।
आवहतु जातवेदाः श्रियमिव नः पादुके नित्यम् ॥ २२.२०॥ ७५०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
काञ्चन पद्धति द्वाविंशी ॥